श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ चतुश्चत्वारिंशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ चतुश्चत्वारिंशः सर्गः ॥

## श्रीरामस्याज्ञया समेषां भ्रातॄणां तत्पार्श्व आगमनम्

विसृज्य तु सुहृद्वर्गं बुद्ध्या निश्चित्य राघवः।
समीपे द्वाःस्थमासीनमिदं वचनमब्रवीत्॥ **7.44.1** ॥

शीघ्रमानय सौमित्रिं लक्ष्मणं शुभलक्षणम्।
भरतं च महाभागं शत्रुघ्नमपराजितम्॥ **7.44.2** ॥

रामस्य वचनं श्रुत्वा द्वाःस्थो मूर्ध्नि कृताञ्जलिः।
लक्ष्मणस्य गृहं गत्वा प्रविवेशानिवारितः॥ **7.44.3** ॥

उवाच सुमहात्मानं वर्धयित्वा कृताञ्जलिः।
द्रष्टुमिच्छति राजा त्वां गम्यतां तत्र मा चिरम्॥ **7.44.4** ॥

बाढमित्येव सौमित्रिः कृत्वा राघवशासनम्।
प्राद्रवद् रथमारुह्य राघवस्य निवेशनम्॥ **7.44.5** ॥

प्रयान्तं लक्ष्मणं दृष्ट्वा द्वाःस्थो भरतमन्तिकात्।
उवाच भरतं तत्र वर्धयित्वा कृताञ्जलिः॥ **7.44.6** ॥

विनयावनतो भूत्वा राजा त्वां द्रष्टुमिच्छति।
भरतस्तु वचः श्रुत्वा द्वाःस्थाद् रामसमीरितम्॥ **7.44.7** ॥

उत्पपातासनात् तूर्णं पद्भ्यामेव महाबलः।
दृष्ट्वा प्रयान्तं भरतं त्वरमाणः कृताञ्जलिः॥ **7.44.8** ॥

शत्रुघ्नभवनं गत्वा ततो वाक्यमुवाच ह।
एह्यागच्छ रघुश्रेष्ठ राजा त्वां द्रष्टुमिच्छति॥ **7.44.9** ॥

गतो हि लक्ष्मणः पूर्वं भरतश्च महायशाः।
श्रुत्वा तु वचनं तस्य शत्रुघ्नः परमासनात्॥ **7.44.10** ॥

शिरसा वन्द्य धरणीं प्रययौ यत्र राघवः।
द्वाःस्थस्त्वागम्य रामाय सर्वानेव कृताञ्जलिः॥ **7.44.11** ॥

निवेदयामास तथा भ्रातॄन् स्वान् समुपस्थितान्।
कुमारानागताञ्छ्रुत्वा चिन्ताव्याकुलितेन्द्रियः॥ **7.44.12** ॥

अवाङ्मुखो दीनमना द्वाःस्थं वचनमब्रवीत्।
प्रवेशय कुमारांस्त्वं मत्समीपं त्वरान्वितः॥ **7.44.13** ॥

एतेषु जीवितं मह्यमेते प्राणाः प्रिया मम।
आज्ञप्तास्तु नरेन्द्रेण कुमाराः शुक्लवाससः॥ **7.44.14** ॥

प्रह्वाः प्राञ्जलयो भूत्वा विविशुस्ते समाहिताः।
ते तु दृष्ट्वा मुखं तस्य सग्रहं शशिनं यथा॥ **7.44.15** ॥

सन्ध्यागतमिवादित्यं प्रभया परिवर्जितम्।
बाष्पपूर्णे च नयने दृष्ट्वा रामस्य धीमतः।
हतशोभं यथा पद्मं मुखं वीक्ष्य च तस्य ते॥ **7.44.16** ॥

ततोऽभिवाद्य त्वरिताः पादौ रामस्य मूर्धभिः।
तस्थुः समाहिताः सर्वे रामस्त्वश्रूण्यवर्तयत्॥ **7.44.17** ॥

तान् परिष्वज्य बाहुभ्यामुत्थाप्य च महाबलः।
आसनेष्वासतेत्युक्त्वा ततो वाक्यं जगाद ह॥ **7.44.18** ॥

भवन्तो मम सर्वस्वं भवन्तो जीवितं मम।
भवद्भिश्च कृतं राज्यं पालयामि नरेश्वराः॥ **7.44.19** ॥

भवन्तः कृतशास्त्रार्था बुद्ध्या च परिनिष्ठिताः।
सम्भूय च मदर्थोऽयमन्वेष्टव्यो नरेश्वराः॥ **7.44.20** ॥

तथा वदति काकुत्स्थे अवधानपरायणाः।
उद्विग्नमनसः सर्वे किं नु राजाभिधास्यति॥ **7.44.21** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे चतुश्चत्वारिंशः सर्गः॥